# श्री परशुराम कृत दुर्गा स्तोत्रं

## परशुराम उवाच

श्रीकृष्णस्य च गोलोके परिपूर्ण तमस्य च | आविर्भूता विग्रहत: पुरा सृष्ट्युन्मुखस्य च ||
सूर्यकोटि प्रभायुक्ता वस्त्रालंकार भूषिता | वह्निशुद्धां शुकाधाना सुस्मिता सुमनोहरा ||
नवयौवन सम्पन्ना सिन्दूरविन्दु शोभिता | ललितं कबरीभारं मालतीमाल्य मण्डितम् ||
अहोनिर्वचनीया त्वं चारुमूर्ति च बिभ्रती | मोक्षप्रदा मुमुक्षूणां महाविष्णो र्विधि: स्वयम् ||
मुमोह क्षणमात्रेण द्द त्वां सर्वमोहिनीम् | बालै: सम्भूय सहसा सस्मिता धाविता पुरा || ५ ||

सद्भि: ख्याता तेन राधा मूलप्रकृति रीश्वरी | कृष्णस्त्वां सहसाहूय वीर्याधानं चकार ह ||
ततो डिम्भं महज्जज्ञे ततो जातो महाविराट् | यस्यैव लोमकूपेषु ब्रह्माण्डा न्यखिलानि च ||
तच्छृङ्गार क्रमेणैव त्वन्नि:श्वासो बभूव ह | स नि:श्वासो महावायु: स विराड् विश्वधारक: ||
तव घर्मजलेनैव पुप्लुवे विश्वगोलकम् | स विराड् विश्वनिलयो जलराशिर्बभूव ह ||
ततस्त्वं पञ्चधाभूय पञ्चमूर्ती श्च बिभ्रती | प्राणाधिष्ठातृ मूर्तिर्या कृष्णस्य परमात्मन: || १० ||

कृष्ण प्राणाधिकां राधां तां वदन्ति पुराविद: | वेदाधिष्ठातृ मूर्तियां वेदाशास्त्र प्रसूरपि ||
तौ सावित्रीं शुद्धरूपां प्रवदन्ति मनीषिण: | ऐश्वर्याधिष्ठातृमूर्ति: शान्तिश्च शान्तरूपिणी ||
लक्ष्मीं वदन्ति संतस्तां शुद्धां सत्त्वस्रूपिणीम् | रागाधिष्ठातृ देवी या शुक्लमूर्ति: सतां प्रसू: ||
सरस्वतीं तां शास्त्रज्ञां शास्त्रज्ञा: प्रवदन्त्यहो | बुद्धिर्विद्या सर्वशक्ते र्या मूर्ति रधिदेवता ||
सर्वमङ्गल मङ्गल्या सर्वमङ्गल रूपिणी | सर्वमङ्गल बीजस्य शिवस्य निलयेधुना || १५ ||

शिवेशिवा स्वरूपा त्वं लक्ष्मीर्नारायणान्तिके | सरस्वती च सावित्री वेदसूर्ब्रह्मण: प्रिया ||
राधा रासेश्वरस्यैव परिपूर्ण तमस्य च | परमानन्द रूपस्य परमानन्द रूपिणी ||
त्वत्कलांशांशकलया देवा नामपि योषित: | त्वं विद्या योषित: सर्वास्त्वं सर्वबीजरूपिणी ||
छाया सूर्यस्य चन्द्रस्य रोहिणी सर्वमोहिनी | शची शक्रस्य कामस्य कामिनी रतिरीश्वरी ||
वरुणानी जलेशस्य वायो: स्त्री प्राणवल्लभा | वह्ने: प्रिया हि स्वाहा च कुबेरस्य च सुन्दरी || २० ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

यमस्य तु सुशीला च नैर्ऋतस्य च कैटभी | ईशानस्य शशिकला शतरूपा मनो: प्रिया ||
देवहूति: कर्दमस्य वसिष्ठस्या प्यरुन्धती | लोपामुद्रा प्यगस्त्यस्य देवमाता दिति स्तथा ||
अहल्या गौतमस्यापि सर्वाधारा वसुन्धरा | गङ्गा च तुलसी चापि पृथिव्यां या: सरिद्वरा: ||
एता: सर्वाश्च या ह्यन्या: सर्वास्त्वत्कलयाम्बिके | गृहलक्ष्मीगर्हे नृणांराजलक्ष्मी श्च राजसु ||
तपस्विनां तपस्या त्वं गायत्री ब्राह्मणस्य च | सतां सत्त्व स्वरूपा त्वमसतां कलहाङ्कुरा || २५ ||

ज्योतीरूपा निर्गुणस्य शक्ति स्त्वं सगुणस्य च | सूर्ये प्रभास्वरूपा त्वं दाहिका च हुताशने ||
जले शैत्यस्वरूपा च शोभारूपा निशाकरे | त्वं भूमौ गन्धरूपा च आकाशे शब्दरूपिणी ||
क्षुत्पिपासादयस्त्वं च जीविनां सर्वशक्त य: | सर्वबीजस्वरूपा त्वं संसारे साररूपिणी ||
स्मृतिर्मेधा च बुद्धिर्वा ज्ञानशक्ति र्विपश्चिताम् | कृष्णेन विद्या या दत्ता सर्वज्ञानप्रसू: शुभा ||
शूलिने कृपया सा त्वं यतो मृत्युञ्जय: शिव: | सृष्टिपालन संहारशक्त यस्त्रिविधा श्च या: || ३० ||

ब्रह्म विष्णु महेशानां सा त्वमेव नमोऽस्तु ते | मधुकैटभ भीत्या च त्रस्तो धाता प्रकम्पित: ||
स्तुत्वा मुमोच यां देवीं तां मूधनर् प्रणमाम्यहम् | मधुकैटभयो र्युद्धे त्रातासौ विष्णुरीश्वरीम् ||
बभूव शक्ति मान् स्तुत्वा तां दुर्गां प्रणमाम्यहम् | त्रिपुरस्य महायुद्धे सरथे पतिते शिवे ||
यां तुष्टुवु: सुरा: सर्वे तां दुर्गां प्रणमाम्यहम् | विष्णुना वृषरूपेण स्वयं शम्भु: समुत्थित: ||
जघान त्रिपुरं स्तुत्वा तां दुर्गां प्रणमाम्यहम् | यदाज्ञया वाति वात: सूर्यस्तपति संततम् || ३५ ||

वर्षतीन्द्रो दहत्यग्निस्तां दुर्गां प्रणमाम्यहम् | यदाज्ञया हि कालश्च शश्वद् भ्रमति वेगत: ||
मृत्युश्चरति जन्त्वोघे तां दुर्गां प्रणमाम्यहम् | स्त्रष्टा सृजति सृष्टिं च पाता पाति यदाज्ञया ||
संहर्ता संहरेत् काले तां दुर्गां प्रणमाम्यहम् | ज्योति:स्वरूपो भगवाञ्छ्रीकृष्णो निर्गुण: स्वयम् ||
यया विना न शक्त श्च सृष्टिं कर्तु नमामि ताम् | रक्ष रक्ष जगन्मातरपराधं क्षमस्व ते ||
शिशूनामपराधेन कुतो माता हि कुप्यति | इत्युक्त्वा पर्शुरामश्च प्रणम्य तां रुरोद ह || ४० ||

तुष्टा दुर्गा सम्भ्रमेण चाभयं च वरं ददौ | अमरो भव हे पुत्र वत्स सुस्थिरतां व्रज ||
शर्वप्रसादात् सर्वत्र ज्योऽस्तु तव संततम् | सर्वान्तरात्मा भगवांस्तुष्टोऽस्तु संततं हरि: ||
भक्ति र्भवतु ते कृष्णे शिवदे च शिवे गुरौ | इष्टदेवे गुरौ यस्य भक्ति र्भवति शाश्वती ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

www.viswakalyanam.org

तं हन्तु न हि शक्ता श्च रुष्टाश्च सर्वदेवता: |
श्रीकृष्णस्य च भक्त स्त्वं शिष्यो हि शंकरस्य च ||
गुरुपत्नीं स्तौषि यस्मात् कस्त्वां हन्तुमिहेश्वर: |
अहो न कृष्णभक्तानामशुभं विद्यते क्वचित् || ४५ ||

अन्यदेवेषु ये भक्ता न भक्ता वा निरेङ्कुशा: | चन्द्रमा बलवांस्तुष्टो येषां भाग्यवतां भृगो ||
तेषां तारागणा रुष्टा: किं कुर्वन्ति च दुर्बला: | यस्य तुष्ट: सभायां चेन्नरदेवो महान् सुखी ||
तस्य किं वा करिष्यन्ति रुष्टा भृत्याश्च दुर्बला: | इत्युक्त्वा पार्वती तुष्टा दत्त्वा रामं शुभाशिषम् ||
जगामान्त:पुरं तूर्ण हरिशब्दो बभूव ह | स्तोत्रं वै काण्वशाखोक्तं पूजाकाले च य: पठेत् ||
यात्राकाले च प्रातर्वा वाञ्छितार्थं लभेद्ध्रुवम | पुत्रार्थी लभते पुत्रं कन्यार्थी कन्यकां लभेत् || ५० ||

विद्यार्थी लभते विद्यां प्रजार्थी चाप्नुयात् प्रजाम् | भ्रष्टराज्यो लभेद् राज्यं नष्टवित्तो धनं लभेत् ||
यस्य रुष्टो गुरुर्देवो राजा वा बान्धवोऽथवा | तस्य तुष्टश्च वरद: स्तोत्रराजप्रसादत: ||
दस्युग्रस्तोऽहिग्रस्तश्च शत्रुग्रस्तो भयानक: | व्याधिग्रस्तो भवेन्मुक्त : स्तोत्रस्मरणमात्रत: ||
राजद्वारे श्मशाने च कारागारे च बन्धने | जलराशौ निमगन्श्च मुक्त स्तत्स्मृतिमात्रत: ||
स्वामिभेदे पुत्रभेदे मित्रभेदे च दारुणे | स्तोत्रस्मरणमात्रेण वाञ्छितार्थं लभेद् ध्रुवम || ५५ ||

कृत्वा हविष्यं वर्षं च स्तोत्रराजं श्रृणोति या | भक्त्या दुर्गां च सम्पूज्य महावन्ध्या प्रसूयते ||
लभते सा दिव्यपुत्रं ज्ञानिनं चिरजीविनम् | असौभाग्या च सौभाग्यं षण्मासश्रवणाल्लभेत् ||
नवमासं काकवन्ध्या मृतवत्सा च भक्ति त: | स्तोत्रराजं या श्रृणोति सा पुत्रं लभते धुरवम् ||
कन्यामाता पुत्रहीना पञ्जमासं श्रृणोति या | घटे सम्पूज्य दुर्गां च सा पुत्रं लभते धुरवम् || ५९ ||

## इति श्री परशुराम कृत दुर्गा स्तोत्रं सम्पूर्णं





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133